International Journal of Sanskrit Research 2020; 6(1): 73-75

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 73-75
© 2020 IJSR
www.anantaajournal.com
Received: 11-11-2019
Accepted: 15-12-2019

**बाप्पा राजवंशी**
शोधच्छात्र, संस्कृत-पालि-प्राकृतविभाग, विश्वभारती, शान्तिनिकेतनम्, पश्चिम बंगाल, भारत

Corresponding Author:
**बाप्पा राजवंशी**
शोधच्छात्र, संस्कृत-पालि-प्राकृतविभाग, विश्वभारती, शान्तिनिकेतनम्, पश्चिम बंगाल, भारत

# साहित्यशास्त्रे कविसहृदयोर्भेदाभेदश्च

**बाप्पा राजवंशी**

## प्रस्तावना

"कवृ वर्णे इति धातोः व्युत्पन्नः कविशब्दः। यः कवते वर्णयति वा स कविः"[1]। कविषु बहुश्रेष्ठोऽस्ति कालिदासः। तस्य कर्म काव्यम्। वस्तुतः कवेः कवित्वं पूर्वमेव वर्तते। यदा सः काव्यं करोति तदा अयं कविः इति लोकतः अभिज्ञानं सम्पद्यते। बाल्मीकिपर्यन्तं प्रतिभाशालीनः अपि आसन् किन्तु ते काव्यं न लिखितवन्तः। तस्मात् तेषां कविः इति परिचयः लोके नासीत्। वर्णना यावत्पर्यन्तं न जाता तावत्पर्यन्तं कवित्वमपि नोदितं, बहिः न प्रकटीभूतं वा इत्यर्थः। आत्माभिव्यञ्जनशक्तिशून्यः कोऽपि कविप्रतिष्ठां कथं लभते ? अर्जितमपि प्रचुरं ज्ञानं योऽभिव्यक्तं कर्तुं यदि न शक्तस्तदा तस्य ज्ञानेन किम्? अतो वाग्विदग्धता तस्यैव प्रसीदति यो वस्तुतः कविः सत्कविः। अन्यथा ते न प्रशंसनीयाः।
ननु कवित्वेन काव्यं काव्येन कवित्वञ्च सिद्ध्यति इति अन्योन्याश्रयदोषः अत्र न सम्भवति। अर्थात् कवित्वमेव काव्यं न सृजति। काव्येन कवित्वञ्च न सृज्यते। यतो हि काव्येन कवित्वं न निर्णीयते, कवित्वं केवलं प्रकटीक्रियते अयं कविः। अन्यथा पितापुत्रयोर्मध्ये अपि अन्योन्याश्रयदोषः स्यात्। पुत्रोत्पत्तिं विना अयं न पिता, पितृत्वं विना न पुत्रोत्पत्तिश्च इति अन्योन्याश्रयदोषः यदि स्यात् तर्हि पुत्र एव नोत्पद्येत जगति। तस्मिन् पुत्रोत्पत्तिसामर्थ्यम् अस्ति इति पुत्रोत्पत्त्या द्रढी क्रियते तावदेव। ननु कविकर्म काव्यम् उच्यते चेत् कवेः यत्किमपि कर्म काव्यं न वा इति चेदुच्यते कविमात्रे यद्दृश्यते तत् कविकर्म भवति। कवेः सर्वमपि न काव्यम्। यत् कर्म केवलं कवौ दृश्यते नान्यत्र तत् काव्यम्। कविः स्नानं करोति, शयनं करोति, गच्छति, धावति तत्सर्वं न काव्यम्। तत् तु अन्यत्रापि कविभिन्ने जने दृश्यते। किन्तु काव्यलेखनं कविभिन्ने जने न दृश्यते। तस्मात् यत् कर्म कविमात्रे दृश्यते तदेव कविकर्म। अतः बाल्मीकिकालिदासादीनां कर्माणि यानि सन्ति तानि काव्यानि इति यथार्थमेव।
साहित्यशास्त्रज्ञः काव्यमेव आश्रित्य शास्त्रे भाषन्ते। सहृदयाः अपि काव्यानि एव आस्वादयन्ति। काव्यमवलम्ब्य एव सहृदयस्य शास्त्रज्ञस्य च कार्यं चलति। यदि काव्यमेव नास्ति तर्हि द्वयोरपि कार्यं नास्ति। तस्मात् द्वयोः अपि अत्यन्तम् आदरणीयः भवति काव्यकर्ता कविः। अयं कविः ऋषिरिति सम्मानीतः। कविः साक्षात् ऋषिः इत्येव न अर्थः। तत्समानता अत्र दृश्यते। तर्हि को नाम ऋषिः ? दर्शनं यस्य अस्ति सः ऋषिः। किं नाम दर्शनम्। लौकिकाः ये पदार्थाः सन्ति तेषाम् अलौकिकरूपेण स्वस्मिन् साक्षात्कारो दर्शनम्। उदाहरणं यथा चन्द्रः अस्ति। चन्द्रं दृष्ट्बा सामान्यः जनः चिन्तयति चन्द्रः ग्रहः इति। किन्तु कविः चिन्तयति नायं चन्द्रः, अयम् आकाशगङ्गायाः श्वेतकमलम्

[1] अलंकारशास्त्रोपकण्ठम्, पृष्ठम् - ४

इति। लोकसामान्यव्यावहारम् इत्थं न भवति। अर्थात् प्रथमं कवेः मनसि पदार्थस्य दर्शनेन प्रतिभावलात् तद्विषयकं यत्किञ्चित् ज्ञानं स्फुरति। इत्थं यं कञ्चनपदार्थम् अवलोक्य सः मनसि गृह्णाति एतत् एवम् इति। तद् ग्रहणमेव दर्शनम् इत्युच्यते। चन्द्रं दृष्टवान्। सः जानाति चन्द्रः वस्तुतः ग्रहः एव। तथा जानन्नपि एवं मनसा गृह्णाति चन्द्रः आकाशगङ्गायाः श्वेतकमलम् इति। एवं दर्शनं ग्रहणं च भवति। कवेः कल्पना इति सामान्यतः लोके उच्यते। ऋषेः अपि इत्थं दर्शनं भवति। व्यवस्थितस्वरशब्दछन्दोरीत्या यदा तेषां मनसः कल्पना बहिरागच्छति तदा मन्त्रः उदेति। काव्यमपि तथैव। एतदेव यास्कमहर्षिः निरुक्तशास्त्रे वदति " कविः क्रान्तदर्शनः [2]" इति। सामान्यजनानां मनसः अतीतं यदस्ति तत् क्रान्तम्। तत् क्रान्तं यः पश्यति सः क्रान्तदर्शनः। अतिक्रान्तं, लोकातीतं वा पश्यति। लोकातीतं नाम यत् लोके नास्ति तत् पश्यति इति न अर्थः। लोके यदस्ति तं पदार्थमेव पश्यति किन्तु दर्शनशैली भिन्ना। समानार्थोऽपि लभ्यते ईशावास्योपनिषदि -

" कविर्मनीषी परिभूः स्वयम्भू-
र्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः [3]"।

वस्तुतः सर्वोपरिस्थितः सूर्यः सर्वमपि द्रष्टुं शक्नुयात्। तेनापि यत् द्रष्टुम् अशक्यं तदपि पश्यति कविः। तस्मात् कविः क्रान्तदर्शी। कालिदासः कथयति " छाया हि भूमेः शशिनो मलत्वेनारोपिता शुद्धिमतः प्रजाभिः [4]" इति चतुर्दशे सर्गे अस्ति रघुवंशे। श्रीरामे आक्षेपं कृतवन्तः जनाः राष्ट्रे। सः परगृहस्थं पत्नीं पुनः स्वीकृतवान् इति कारणात्। तस्य वर्णना करोति कालिदासः। भूमेः छाया चन्द्रोपरि यदा पतति तदा तां छायां चन्द्रस्य मलम् इति स्वीकुर्वन्ति जनाः। चन्द्रग्रहणकाले भूमेः छाया चन्द्रे पतति। तदा चन्द्रः कृष्णवर्णः दृश्यते। भूमेः छाया चन्द्रोपरि पतति इति कालिदासो जानाति स्म। वैज्ञानिकाः त्रयोदशशतके उक्तवन्तः। किन्तु ततः सहस्रवर्षेभ्यः पूर्वं कालिदासः काव्ये वर्णितवान्। चन्द्रः यदा यदा दृश्यते तदा तदा उपरि एव दृश्यते। तस्मात् भूमेः छाया तत्र गच्छति इति कोऽपि कल्पयितुमपि न शक्नोति। एवं कवयः बहुशास्त्रव्युत्पन्नाः सन्तः एव काव्यानि कुर्वन्ति स्म।

लोकवत् काव्येऽपि व्यवहारः क्रियते चेत् काव्यस्य काव्यत्वमेव न सिद्ध्यति। तर्हि का नाम अलोकसामान्यता इति चेत् सामान्यजनानां मनसः अतीतत्वम् अलोकसामान्यत्वम् अथवा लोकोत्तरत्वम्। उदाहरणमस्ति चन्द्रः कश्चित् ग्रहः इति लोकसामान्यो व्यवहारः। किन्तु चन्द्रः गगनसरसीराजहंसः अर्थात् आकाशरूपसरवरस्य राजहंसः चन्द्रः इति अलोकसामान्यः। एतादृशः लोकव्यवहारो नास्ति। तर्हि का नाम वर्णना चेदुच्यते कविः चन्द्रं दृष्टवान्, चन्द्रदर्शनेन आकाशरूपसरवरस्य राजहंस इव दृश्यते इति मनसि साक्षात्कृतस्य विषयस्य दर्शनं जातम्। इदानीं मनसि यत् स्फुरणम् उत्पन्नं तस्य उचितशब्दैः बहिः सुन्दरं प्रकटनं वर्णना नाम भवति। तर्हि वर्णातः पूर्वं दर्शनम् आवश्यकम्। दर्शनं नाम पदार्थस्य अलौकिकतया स्फुरणम्। अलौकिकतया स्फुर्तस्य विषयस्य उचितशब्दैः सरसं प्रतिपादनं क्रियते चेत् वर्णना इति भवति। एवं दर्शनं वर्णनं च यस्य विद्यते सः कविः भवितुम् अर्हति। सः कविः पदार्थानाम् अलौकिकतया स्फुरणसमकाले एव स्वस्मिन् ब्रह्मानन्दसदृशम् आनन्दम् अनुभवति। कविः कल्पनास्फुरणसमकाले एव आनन्दम् अनुभवति। तदा एव मनः अन्तर्मुखं भवति। आनन्दमग्नतां विना कविः एकम् उत्तमं काव्यं कर्तुं न शक्नोति। पूर्वं स्वयम् आनन्दमग्नता स्यात्। तम् आनन्दानुभवं यदा सः उचितशब्दैः प्रकाशयति तदा काव्यं समुन्मीलति। कविः स्वस्मिन् अन्तःकरणे जातं यत् अनुभवं प्रकाशयति तदेव काव्यम्। लोके अस्माकम् आनन्दः विषयद्वारा भवति। अतः लौकिकानन्दः इत्युच्यते। कवेः प्रतिभाद्वारा यः आनन्दः भवति सः अलौकिकानन्दः। तत्र आनन्दानुभवः यथा दृढः भवति तथा उत्कृष्टं काव्यं बहिरागच्छति। अतः काव्यकरणात् पूर्वं रसमग्नता आवश्यकम्। आनन्दस्य सम्यक् अनुभवः भवति चेत् समीचीनं काव्यं भवति। कविः प्रथमं स्वस्मिन् आनन्दानुभवं प्राप्नोति। तस्य आनन्दानुभवस्य एव अग्रिमकार्यम् अस्ति काव्यम्। तस्मात् काव्येऽपि स एव आनन्दः अस्ति। तत् काव्यं पठित्वा अन्यः अपि तादृशम् आनन्दम् अनुभवति। एवं दर्शनवर्णनसामर्थ्यद्वयवान् कविः। कवेः प्रतिभा यादृशी अस्ति तादृशं दर्शनं तादृशं च वर्णनं भवति। कविप्रतिभा उत्कृष्टा अस्ति चेत् उत्कृष्टं दर्शनम् उत्कृष्टञ्च वर्णनं सम्भवति। कवेः प्रतिभा किञ्चित् दुर्वला अस्ति चेत् दुर्वलमेव दर्शनं पुनः दुर्वलमेव वर्णनं भवति। अतः कवेः या काव्यसृष्टिः अस्ति सा अपूर्वा, प्रतिभाभिन्नत्वाच्च। बाह्यलोकात् अस्माभिः यदा ज्ञानम् अन्तः स्वीक्रियते तदा विद्वत्त्वम् उत्पद्यते। प्रतिभा नाम न तथा। अन्तरङ्गात् बहिः प्रकाशनं प्रतिभा। बहिःस्थितस्य अन्तःस्वीकारः पाण्डित्यम् इत्यनयोः पाण्डित्यप्रतिभयोः पार्थक्यम्। प्रतिभा पदार्थं पूर्वम् आविष्करोति। विद्वता आविष्कृतस्य पदार्थस्य औचित्यानौचित्येन चिन्तनं करोति। तस्मात् कवेः द्वयमपि आवश्यकम्। प्रतिभा मनसि तादृशम् अर्थं सम्यक् जनयति। तदा कविः एवम् अवगतः अर्थः अस्ति, तस्य वर्णनं कथं करणीयं, केन शब्देन क्रियते चेत् सम्यक् भवति इत्यादिकं विचिन्त्य तत्कुर्यात्। एतेन शब्देन क्रियते

[2] अलंकारशास्त्रोपकण्ठम्, पृष्ठम् - ४
[3] ईशावास्योपनिषद् - ८
[4] रघुवंशम् - १४।४०

चेत् सम्यक् भवति, तेन क्रियते चेत् सम्यक् न भवति इत्यादिविवेकः यः अस्ति सः विवेकः विद्वत्तालभ्यः। नूतनार्थस्फुरणं तु प्रतिभायाः कार्यम्। ज्ञानम् अभ्यासबलेन संग्रहीतुं शक्यते किन्तु प्रतिभा अभ्यासबलेन संग्रहीतुं न शक्यते। अभ्यासेन प्रतिभायाः किञ्चित् परिष्कारः शक्यते। प्रतिभायाः उत्पत्तिः शास्त्राध्ययनेन न सम्भवति। तथा भवति चेत् यः यः शास्त्राध्ययनं करोति सः सः काव्यं कुर्यात्। तथा तु लोके नास्ति। प्रतिभया सह शुद्धं ज्ञानम् आवश्यकम् अपि च तीव्रतराभ्यासः आवश्यकः। तथा अस्ति चेत् साधुकाव्यं भवति।

काव्यानुभवसामर्थ्यं बहूनां न दृश्यते। तेषां व्यङ्ग्यार्थग्रहणे सामर्थ्यं न सन्ति। यथा कश्चन चौरः अपरं चौरं प्रति सायंकाले कथयति गतोऽस्तमर्कः। अर्थात् इदानीं चौर्यार्थं गन्तुम् उचितः कालः अस्ति, अतः गच्छावः इत्यर्थः। वाक्यमिदं श्रुत्वा व्यङ्ग्यार्थग्रहणपटुः अपरः बालकः क्रीडां त्यक्त्वा गृहं गतवान्। गृहं गच्छ इति तेन नोक्तम्। गृहं गन्तव्यमिति व्यङ्ग्यार्थः। एवं ध्वनिप्रधानं काव्यम् आस्वादयितुं ये शक्नुवन्ति ते सहृदयाः। सहृदयेषु भावनासामर्थ्यं तिष्ठति। कविः यथा वर्णितवान् तथा एव अर्थं मनसा ये भावयन्ति ते सहृदयाः। सर्वेषां जीवानां हृदये सत्यपि सर्वे न सहृदयाः । कविकर्मरूपकाव्यस्य आस्वादनकर्ता सहृदयः। सहृदय इति शब्दस्य अर्थः अस्ति कविसमानं हृदयं यस्य अस्ति सः सहृदयः। अर्थात् काव्यस्य निर्माणकाले कविः यादृशम् आनन्दं लब्धवान् तादृशमेव आनन्दानुभवं यस्य भवति सः सहृदयः। हृदयेन सहित सहृदयः इत्यपि भवति। सहृदयाः न सन्ति चेत् काव्यं न जीवति। अध्येतारा: सन्ति चेत् ग्रन्थस्य अग्रे मुद्रणं सम्भवति। अतः पठितारा: न सन्ति चेत् काव्यं म्रियते। तस्मात् यद्यपि काव्यानाम् उत्पत्तिस्थानं कविः तथापि जीवनस्थानं तु सहृदयः एव। काव्यस्य शाश्वतजीवनस्थानं कविसमानः सहृदयः।

कविकल्पनया उत्पन्नं काव्यं शृण्वन् यथा कविना वर्णितम् अस्ति तथा एव मनसि प्रतिपद्यते चेत् कविरिव सः सहृदयोऽपि काव्यानन्दम् अनुभवति। तेन द्वयोः कविसहृदयोः एकरूपः मनः स्वभावः इति तयोः सादृश्यम्। कविः काव्यवर्णनात्पूर्वम् आनन्दानुभवं प्राप्तवान्। तदेव सः कविः शब्देन प्रकाशयति। काव्यात्मकं शब्दं श्रुत्वा सहृदयोऽपि तादृशमेव अर्थं मनसा स्वीकरोति। तदा कवेः यादृशानन्दानुभूतिः आसीत् स एव आनन्दानुभूतिः सहृदयस्यापि भवति। अत्रैव तयोः कविसहृदयोः समानता सादृश्यं वा वर्तते। आनन्दानुभवे कविः स्वतन्त्रः। कविः काव्यं कर्तुं यदा इच्छति अर्थात् यदा सः कल्पयति तस्मिन् क्षणे एव सः आनन्दम् अनुभवति। सहृदयः तथा स्वयम् आनन्दम् अनुभोक्तुं न शक्नोति। तदर्थं कवेः वर्णनात्मकं काव्यम् आवश्यकम्। अतः काव्यानन्दानुभवे कविः स्वतन्त्रः। सहृदयस्तु कविवर्णनाधीनः। अर्थात् कविवर्णना लभ्यते चेत् आनन्दं प्राप्तुम् अर्हति इत्यनयोः कविसहृदयोः भेदः। कविः काव्ये स्वकीयानन्दानुभवं शब्देन वर्णयति। सहृदयः तद्वाक्यं पठित्वा तथानन्दं प्राप्नोति यथानन्दं कवेः आसीत्। अर्थात् कविवर्णनद्वारा रसिकः सहृदयो वा कविना अनुभूतमेव प्राप्नोति। अलंकारशास्त्रे सहृदयशब्दस्य अन्यानि शब्दाः प्रयुज्यन्ते, यथा सकृत्,रसिकः,सचेताः, भावुकः इति। काव्यस्य गुणानाम् अगुणानां च चर्चा कर्तुं शक्नोति सहृदयः। केवलं संस्कृतभाषा ज्ञायते अथवा काव्यानि पठितवान् इति कारणात् साहित्यशास्त्रे ग्रन्थं कर्तुं न पारयति। सहृदयश्रेष्ठः अस्ति चेत् अलंकारशास्त्रग्रन्थं निर्मातिम् अर्हति। न पुनः शुष्कजरन्नैयायिकादयः। पत्रोपस्थापनस्य अन्ते आगत्य मम मनसि भाति-

"आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः [5]"

इत्युक्त्वा अत्रैव विरमामि। नमः सर्वेभ्यः।

## सन्दर्भ


1. उपाध्यायः, आचार्यशिवाजी। काव्यप्रकाशः। वाराणसीः सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, २००२। मुद्रणम्।
2. त्रिपाठी, डा. रामसागरः। ध्वन्यालोकः। दिल्ली : मोतीलाल-बनारसी-दासः, १९६३। मुद्रणम्।
3. नागरः, डा. रविशङ्करः। व्यञ्जनाविमर्शः। दिल्ली : वन्दनाप्रकाशनम्, संवत् २०३३। मुद्रणम्।
4. भट्टः, वेङ्कटरमणः। अलंकारशास्त्रोपकण्ठम्। बेलुडमठः : रामकृष्णमिशन् विवेकानन्द विश्वविद्यालयः, २०१२। मुद्रणम्।
5. मिश्रः, धारादत्तः। रघुवंशमहाकाव्यम्। दिल्लीः मोतीलालबनारसीदासः, २००४। मुद्रणम्।
6. स्वामी गम्भीरानन्दः। उपनिषद्ग्रन्थाबली। कलिकाताः उद्बोधनकार्यालयम्, २०१७। मुद्रणम्।
7. सिंहः, डा. सत्यव्रतः। साहित्यदर्पणः। वाराणसीः चौखम्बाविद्याभवनम्, २०१४। मुद्रणम्।
8. Kale MR. The Abhijnanasakuntalm of Kalidasa. Delhi: MLBD, 2000. Print.
9. Krishnamoorthy Dr. K. Essays in Sanskrit Criticism. Dharwad: Karnatak University, 1977.


5 The Abhijnanasakuntalm of Kalidasa – 1/2